श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री वेङ्कटेश स्वामिना विरचितं

# ॥ श्री किङ्गृहेशस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री किङ्गृहेशस्तुतिः ॥

अयत्नसङ्कल्पितसर्वलोक -
    सर्गापवर्गस्थितिसंविधानम्।
अनादिमध्यान्तमशेषनाथं
    किङ्गृहनाथं शरणं भजामि ॥ 1 ॥

अकृत्रिमानां वचसामभूमिं
    अगोचरं ब्रह्मशिवादिवाचाम्।
अहं स्तुवे किङ्गृहनायक त्वां
    तथाप्यलज्जंस्तु मितम्पचोक्तिः ॥ 2 ॥

अकिञ्चनोऽनन्यगतिस्त्वदीय
    स्तुतिं करोमीति मतिं करोमि।
कृपानिधे किङ्गृहनायकाद्य
    त्वमेव मे वाचमुदीरयेथाः ॥ 3 ॥

त्वयैव दत्तामुपलभ्य वाणीं
    अणीयसीमप्यतुलप्रभावम्।
प्रसादये किङ्गृहनायक त्वां
    न चेत् कुतो मे सफलं वचस्स्यात् ॥ 4 ॥

अनेन जीवेन समस्तवस्तु
    प्रविश्य नामानि च रूपभेदैः।

व्याकृत्य वीक्षावनमध्य भागे
    विभुं शयानं सततं भजामि ॥ 5 ॥

अशेषपुंसां हृदि सन्निविष्टम्
    अनल्पशक्त्यादि गुणैर्विशिष्टम् ।
हृत्ताप हृत्पङ्कज भृङ्गजुष्टं
    देवं भजे किङ्गृहगं ममेष्टम् ॥ 6 ॥

श्रीशालिहोत्रार्पितशालिपिष्ट
    हृष्टो भवान् देवशयिष्णुरेनम् ।
किं गेहमत्रेति यदावदत् तत्
    किङ्गेहमासीत् तव सद्म नाम्ना ॥ 7 ॥

पद्मामहीलालितपादपद्मं
    पद्मासनाधिष्ठितनिम्ननाभिम् ।
शयानमाक्रम्य भुजङ्गतल्पं
    किङ्गेहसद्मानमहं नतोऽस्मि ॥ 8 ॥

विस्मेरमासीत् भुवनं त्वदीय
    चरित्र मन्वीक्ष्य चिरप्रवृत्तम् ।
किङ्गेहनाथासुरकैटभादि
    निबर्हणार्थं किल सर्वशक्ते ॥ 9 ॥

गङ्गादितीर्थानि निषेव्यशम्भुः
    सर्वाणि पुण्यायतनानि गत्वा ।
अमुक्तपूर्वोविधिहत्यया त्वां
    संसेव्य किङ्गेहपते विमुक्तः ॥ 10 ॥

अजह्नुजानोद्य महापराधं
    द्विजं हि हृत्तापहरं सरस्ते।
अतीतरत्कौशिकमद्भुतं त्वत्
    प्रभावतः किङ्गृहनाथ नैतत्॥ **11** ॥

रघुप्रवीरस्य तवार्हमेतत्
    यथागतस्यैव रिपोर्जिघांसोः।
विधूय रक्षस्त्वममुष्य दिव्यम्
    अदाः पदं किङ्गृहनायक त्वम्॥ **12** ॥

पिष्टप्रदीपान् परिकल्प्य ये त्वां
    हृष्टाभजन्तेऽहनि पुष्यदर्शे।
इष्टप्रदायी वितनोषि तेषां
    कष्टोपभोग्यान्यपि काङ्क्षितानि॥ **13** ॥

विकासयन् मानसपङ्कजानि
    विपश्चितां निश्चलभक्तिभाजाम्।
प्रादुर्भवन्नासुरकैटभादि
    तमोरवे त्वं मयि सुप्रसीद॥ **14** ॥

प्रद्युम्ननाम्ने तपसां हि धाम्ने
    कृपाप्रसन्ने त्वयि किङ्गृहेश।
गङ्गाधिकत्वं न किमापतीर्थं
    हृत्तापहं वा तनयं न वन्ध्या॥ **15** ॥

त्वं सर्ववित् त्वं कमलासहायः
    त्वमेव वेदान्त वचोऽवसेयः।
भवन्तमेतं शरणं प्रपन्नाः
    वयं न यस्मात् परमस्ति दैवम्॥ **16** ॥

पुराणपुंभावमहो विगूह्य
    युवत्वमेवाकलयन् सुरूपम्।
उपायमस्त्वं किल धर्मसेन -
    सुतान्नताङ्गीमिह किङ्गृहेश ॥ **17** ॥

श्री भूमिलालितपदं श्रितशेषतल्पं
    कल्पान्तयोग्यभुवनावनयोगनिद्रम्।
श्रीशालिहोत्रशिरसाधृतहस्तपद्मं
    श्रीवीरराघवविभुं श्रयतां मनो मे ॥ **18** ॥

वेङ्कटेशकविना विनिर्मितां
    किङ्गृहाधिपति संस्तुतिं पठन्।
दिव्यभोगमुपभुज्य मानवो
    भव्यरूपमवलोकयेत् प्रभोः ॥ **19** ॥

॥ श्री किङ्गृहेशस्तुतिः समाप्ता ॥